२१

॥अक्षसूक्तम्॥

प्रस्तावना

ऋग्वेदे एकस्य प्रसिद्धदेवस्य स्तुतिं विधाय अभीष्टसिद्ध्यर्थं सः देवः प्रार्थ्यते। एवं मानवानां सामाजिकदुर्व्यवहाराणां निराकरणाय सूक्तानां सङ्कलनं कृतम्। यदा समाजे भोगविलासानां शक्तिः वर्धिता भवति तदा द्युतकार्यम् अपि वर्धते। वैदिककालतः एव अक्षक्रीडा बहुप्रचलितसामाजिककुक्रीडा अस्ति। ऋग्वेदस्य दशममण्डले चतुस्त्रिंशत्तमं सूक्तम् एनं विषयम् आधारीकृतवत्। इदमेव अक्षसूक्तम् इति नाम्ना विख्यातम्। अस्य सूक्तस्य ऐलूषकवषः ऋषिः, त्रिष्टुप् छन्दः, सप्तममन्त्रस्य जगती छन्दः, देवता च अक्षः ऋषिः। अस्मिन् सूक्ते यत् मुख्यतया उक्तं तत् अक्षक्रीडा न करणीया तत्स्थाने कृषिकर्म इत्यादिकर्म कर्तव्यम्। यथा मन्त्रे एव उक्तं- अक्षैर्मा दीव्यः कृषिमित्कृषस्व इत्यादि। एवं प्रकारेण सूक्तस्य माहात्म्यं प्रकटितम्।

उद्देश्यानि

अस्य पाठस्य पठनात् भवान् -

- अक्षसूक्तस्य संहितापाठं पदपाठम् अन्वयं व्याख्यां च पठिष्यति।
- अक्षक्रीडनस्य कुफलं भवान् ज्ञास्यति।
- अक्षक्रीडनात् किं किं त्यक्तं भवति तद् ज्ञास्यति।
- वैदिकशब्दान् ज्ञास्यति।
- वैदिकलौकिकशब्दयोः मध्ये भेदं ज्ञास्यति।
- अक्षक्रीडनस्य स्थाने किं करणीयम् इत्यपि अवगमिष्यति।

२१.१) अधुना मूलपाठं पठाम

प्रा॒वे॒पा मा॑ बृह॒तो मा॑दयन्ति
प्रवा॒तेजा इरि॑णे॒ वर्वृ॑तानाः।

सोम॑स्येव मौजव॒तस्य॑ भ॒क्षो
वि॒भीद॑को॒ जागृ॑वि॒र्मह्य॑मच्छान्॥१॥

न मा॑ मिमेथ॒ न जि॑हीळ ए॒षा
शि॒वा सखि॑भ्य उ॒त मह्य॑मासीत्।
अ॒क्षस्या॒हमे॑कप॒रस्य॑ हेतो-
रनु॑व्रता॒मप॑ जा॒याम॑रोधम्॥२॥

द्वेष्टि॑ श्व॒श्रूरप॑ जा॒या रु॑णद्धि॒
न ना॑थि॒तो वि॑न्दते मर्डि॒तार॑म्।
अश्व॑स्येव॒ जर॑तो॒ वस्न्य॑स्य॒
नाहं वि॑न्दामि कित॒वस्य॒ भोग॑म्॥३॥

अ॒न्ये जा॒यां परि॑ मृशन्त्यस्य॒
यस्यागृ॑ध॒द्वेद॑ने वा॒ज्य१॒॑क्षः।
पि॒ता मा॒ता भ्रात॑र॒ एन॑माहु-
र्न जा॑नीमो॒ नय॑ता ब॒द्धमे॒तम्॥४॥

यदा॒दीध्ये॒ न द॑विषाण्येभिः
परा॒यद्भ्योऽव॑ हीये॒ सखि॑भ्यः।
न्यु॑प्ताश्च ब॒भ्रवो॒ वाच॒मक्र॑त॒
एमीदे॑षां निष्कृ॒तं जा॒रिणी॑व॥५॥

स॒भामे॑ति कित॒वः पृ॒च्छमा॑नो
जे॒ष्यामीति॑ त॒न्वा॒३॒॑ शूशु॑जानः।
अ॒क्षासो॑ अस्य॒ वि ति॑रन्ति॒ कामं॑
प्रति॒दीव्ने॒ दध॑त॒ आ कृ॒तानि॑॥६॥

अ॒क्षास॒ इद॑ङ्कु॒शिनो॑ नितो॒दिनो॑
नि॒कृत्वा॑न॒स्तप॑नास्तापयि॒ष्णवः॑।
कु॒मा॒रदे॑ष्णा॒ जय॑तः पुन॒र्हणो॒
मध्वा॒ सम्पृ॑क्ताः कित॒वस्य॑ ब॒र्हणा॑॥७॥

त्रि॒प॒ञ्चा॒शः क्री॑ळति॒ व्रात॑ एषां
दे॒व इ॑व सवि॒ता स॒त्यध॑र्मा।
उ॒ग्रस्य॑ चिन्म॒न्यवे॒ ना न॑मन्ते॒
राजा॑ चिदेभ्यो॒ नम॒ इत्कृ॑णोति॥८॥

नी॒चा व॑र्तन्त उ॒परि॑ स्फुर-
न्त्यह॒स्तासो॒ हस्त॑वन्तं सहन्ते।
दि॒व्या अङ्गा॑रा॒ इरि॑णे॒ न्यु॑प्ताः
शी॒ताः सन्तो॒ हृद॑यं॒ निर्द॑हन्ति॥९॥

जा॒या त॑प्यते कित॒वस्य॑ ही॒ना
मा॒ता पु॒त्रस्य॒ चर॑तः॒ क्व॑ स्वित्।
ऋ॒णा॒वा बिभ्य॒द्धन॑मि॒च्छमा॑नो॒-
ऽन्येषा॒मस्त॒मुप॒ नक्त॑मेति॥१०॥

स्त्रियं॑ दृ॒ष्ट्वाय॑ कित॒वं त॑तापा॒-
न्येषां॑ जा॒यां सुकृ॑तं च॒ योनि॑म्।
पू॒र्वा॒ह्णे अश्वा॑न्युयु॒जे हि ब॒भ्रू-
न्त्सो अ॒ग्नेरन्ते॑ वृष॒लः प॑पाद॥११॥

यो वः॑ सोना॒नीर्म॑ह॒तो ग॒णस्य॒
राजा॒ व्रात॑स्य प्रथ॒मो ब॒भूव॑।

तस्मै कृणोमि न धाना रुणध्मि
दशाहं प्राचीस्तदृतं वदामि॥१२॥

अक्षैर्मा दीव्यः कृषिमित्कृषस्व
वित्ते रमस्व बहु मन्यमानः।
तत्र गावः कितव तत्र जाया
तन्मे वि चष्टे सवितायमर्यः॥१३॥

मित्रं कृणुध्वं खलु मृळता नो
मा नो घोरेण चरताभि धृष्णु।
नि वो नु मन्युर्विशतामराति-
रन्यो बभ्रूणां प्रसितौ न्वस्तु॥१४॥

२१.१.१) इदानीं मूलपाठम् अवगच्छाम

प्रावेपा मा बृहतो मादयन्ति
प्रवातेजा इरिणे वर्वृतानाः।
सोमस्येव मौजवतस्य भक्षो
विभीदको जागृविर्मह्यमच्छान्॥१॥

पदपाठः- प्रावेपाः। मा। बृहतः। मादयन्ति। प्रवातेऽजाः। इरिणे। वर्वृतानाः॥

सोमस्यऽइव। मौजऽवतस्य। भक्षः। विऽभीदकः। जागृविः। मह्यम्। अच्छान्॥१॥

अन्वयः- प्रवातेजाः बृहतः इरिणे वर्वृतानां प्रावेपाः मा मादयन्ति। मौजवतस्य सोमस्य भक्ष इव जागृविः विभीदकः मह्यम् अच्छन्।

व्याख्या- बृहतः महतो विभीतकस्य फलत्वेन सम्बन्धिनः प्रवातेजाः प्रवणे देशे जाताः इरिणे आस्फारे वर्वृतानाः प्रवर्तमानाः प्रावेपाः प्रवेपिणः कम्पनशीलाः अक्षाः मा मां मादयन्ति हर्षयन्ति। किञ्च जागृविः जयपराजयोर्हर्षशोकाभ्यां कितवानां जागरणस्य कर्त्ता विभीदकविकाराऽक्षो मह्यं माम् अच्छान् अचच्छदत् अत्यर्थं मादयति। तत्र दृष्टान्तः। सोमस्येव यथा सोमस्य मौजवतस्य। मूजवति पर्वते जातो

मौजवतः। तस्य। तत्र ह्युत्तमः सोमो जायते। भक्षः पानं यजमानान् देवांश्च मादयति तद्वदित्यर्थः। तथा च यास्कः- 'प्रवेपिणो मा महतो विभीतकस्य फलानि मादयन्ति। प्रवातेजाः प्रवणेजा इरिणे वर्तमाना इरिणं निर्ऋणमृणातेरपार्णं भवत्यपरता अस्मादोषधय इति वा। सोमस्येव मौजवतस्य भक्षो मौजवतो मूजवति जातो मूजवान् पर्वतो मुञ्चवान् मुञ्जो विमुच्यत इषीकामिषीकैषतेर्गतिकर्मण इयमपीतरेषीकैतस्मादेव विभीतको बिभेदनाज्जागृविर्जागरणन्मह्यमवच्छदत्' (निरु० ९.८)इति।

सरलार्थः- द्रुतप्रवहमानवायुप्रदेशे जाताः इरिणे कम्पमानाः अक्षाः माम् आनन्दयन्ति। विभीदकवृक्षजाताः जागरणकारिणः अक्षाः मां हर्षेण मत्तं कुर्वन्ति यथा मूजवति पर्वते उत्पन्नं सोमं पीत्वा जनाः उन्मत्ताः भवन्ति।

व्याकरणम् -

- वर्वृतानाः-वृद्-धातोः लङि, ततः लङः लुकि शानचि प्रथमाबहुवचने।
- मादयन्ति-मद्-धातोः णिचि लटि प्रथमपुरुषबहुवचने।
- अच्छन्-छन्द्-धातोः लुङि प्रथमपुरुषैकवचने।

न मा मिमेथ न जिहीळ एषा
शिवा सखिभ्य उत मह्यमासीत्।
अक्षस्याहमेकपरस्य हेतो-
रनुव्रतामप जायामरोधम्॥२॥

पदपाठः- न। मा। मिमेथ। न। जिहीळे। एषा। शिवा। सखिऽभ्यः। उत। मह्यम्। आसीत्॥ अक्षस्य। अहम्। एकऽपरस्य। हेतोः। अनुऽव्रताम्। अप। जायाम्। अरोधम्॥२॥

अन्वयः- एषा मा न मिमेथ, न जिहीळे, सखिभ्य उत मह्यम् शिवा आसीत्, अहम् एकपरस्य अक्षस्य हेतोः अनुव्रताम् जायाम् अप अरोधम्।

व्याख्या- एषा अस्मदीया जाया मा मां कितवं न मिमेथ न चुक्रोध, न जिहीळे न च लज्जितवती। सखिभ्यः अस्मदीयेभ्यः शिवा सुखकरी आसीत् अभूत्। उत अपि च मह्यं शिवासीत्। इत्थम्। अनुव्रताम् अनुकूलां जायाम् एकपरस्य एकः परः प्रधानं यस्य तस्य अक्षस्य हेतोः कारणात् अहम् अप अरोधं परित्यक्तवानस्मीत्यर्थः।

सरलार्थः- अस्मिन् मन्त्रे अक्षस्य परिणामः कथ्यते यत् मम पत्नी कदापि कलहं न कृतवती। मयि न क्रोधं चकार। मम मित्राणां च कृते सा कल्याणकारी आसीत्। परन्तु अक्षस्य कारणेन मम अनुकूला जाया मया परित्यक्ता।

व्याकरणम् -

- ममेथ-मिथ्-धातोः लिटि प्रथमपुरुषैकवचने।
- जिहीळे-हीड्-धातोः लिटि प्रथमपुरुषैकवचने।
- अरोधम्- रुध्-धातोः लुङि उत्तमपुरुषैकवचने(वैदिकम्)।

द्वेष्टि श्वश्रूरप जाया रुणद्धि
न नाथितो विन्दते मर्डितारम्।
अश्वस्येव जरतो वस्न्यस्य
नाहं विन्दामि कितवस्य भोगम्॥३॥

पदपाठः- द्वेष्टि। श्वश्रूः। अप। जाया। रुणद्धि। न। नाथितः। विन्दते। मर्डितारम्॥

अश्वस्यऽइव। जरतः। वस्न्यस्य। न। अहम्। विन्दामि। कितवस्य। भोगम्॥३॥

अन्वयः-श्वश्रूः द्वेष्टि, जाया अप रुणद्धि, नाथितः मर्डितारं न विन्दते। अहं वस्न्यस्य जरतः अश्वस्य इव कितवस्य भोगं न विन्दामि।

व्याख्या- श्वश्रूः जायाया माता गृहगतं कितवं द्वेष्टि निन्दतीत्यर्थः। किञ्च जाया भार्या अप रुणद्धि निरुणद्धि। अपि च नाथितः याचमानः कितवो धनं मर्डितारं धनदानेन सुखयितारं न विन्दते न लभते। इत्थं बुद्ध्या विमृशत्वात् नाहं जरतः वृद्धस्य वस्न्यस्य। वस्नं मूल्यं तदर्हस्य अश्वस्येव कितवस्य भोगं न विन्दामि न लभे।

सरलार्थः- यः कितवः भवति तस्य श्वश्रूः तं द्वेष्टि। तस्य पत्नी अपि तम् अपसारयति। धनं याचमानः कितवः सुखदं जनं न प्राप्नोति। बहुमूल्ययुक्तः वृद्धः अश्वः इव अहं(कितवः) जीवनं न इच्छामि।

व्याकरणम् -

- द्वेष्टि-द्विष्-धातोः लटि प्रथमपुरुषैकवचने।
- रुणद्धि-रुध्-धातोः लटि प्रथमपुरुषैकवचने।
- नाथितः-नाथ्-धातोः क्तप्रत्यये प्रथमैकवचने।
- मर्डितारम्-मृड्-धातोः तृच्प्रत्यये द्वितीयैकवचने।
- विन्दति-विद्-धातोः लटि प्रथमपुरुषैकवचने (वैदिकम्)
- जरतः-जृ-धातोः शतृप्रत्यये षष्ठ्यैकवचने।
- विन्दामि- विद्-धातोः लटि उत्तमपुरुषैकवचने।

अन्ये जायां परि मृशन्त्यस्य
यस्यागृधद्वेदने वाज्य१क्षः।
पिता माता भ्रातर एनमाहु-
र्न जानीमो नयता बद्धमेतम्॥४॥

पदपाठः- अन्ये। जायाम्। परि। मृशन्ति। अस्य। यस्य। अगृधत्। वेदने। वाजी। अक्षः॥ पिता। माता। भ्रातरः। एनम्। आहुः। न। जानीमः। नयत। बद्धम्। एतम्॥४॥

अन्वयः-यस्य वेदेन अक्षः अगृधत्, अस्य जायाम् अन्ये परिमृशन्ति, पिता माता भ्रातरम् एनम् आहुः न जानीमः बद्धम् एनं नयत।

व्याख्या- यस्य कितवस्य वेदने धने वाजी बलवान् अक्षः देवः अगृधत् अभिकाङ्क्षां करोति तस्य अस्य कितवस्य जायां भार्याम् अन्ये प्रतिकितवाः परिमृशन्ति वस्त्रकेशाद्याकर्षणेन संस्पृशन्ति। किञ्च पिता जननी च भ्रातरः सहोदराश्च एनं कितवम् आहुः वदन्ति न वयमस्मदीयमेनं जानीमः। रज्वा बद्धमेतं कितवं हे कितवाः यूयं नयत यथेष्टदेशं प्रापयेति।

सरलार्थः- यस्य कितवस्य धने बलवान् अक्षः इष्यते अन्यैः कितवैः, तस्य भार्याम् अन्ये कितवाः वस्त्रकेशाद्याकर्षणेन स्पृशन्ति। पित्रादयः अस्मिन् विषये ऋणदातारं कथयति यत् वयम् एनं न जानीमः यूयम् एनं रज्वा बद्ध्वा नयत।

व्याकरणम् -

- अगृधत्-गृध्-धातोः लङि प्रथमपुरुषैकवचने(वैदिकः)।
- मृशन्ति- मृश्-धातोः लटि प्रथमपुरुषबहुवचने।
- आहुः-ब्रू-धातोःलिटि प्रथमपुरुषबहुवचने।
- जानीमः-ज्ञा-धातोः लटि उत्तमपुरुषबहुवचने।
- नयत- नी-धातोः लोटि मध्यमपुरुषबहुवचने(छान्दसदीर्घः)।
- वाज्य १ क्षः-वाजी+अक्षः, क्षैप्रसन्धिः।

यदादीध्ये न दविषाण्येभिः
परायद्भ्योऽव हीये सखिभ्यः।
न्युप्ताश्च बभ्रवो वाचमक्रत
एमीदेषां निष्कृतं जारिणीव॥५॥

पदपाठः- यत्। आऽदीध्ये। न। दविषाणि। एभिः। परायत्ऽभ्यः। अव। हीये। सखिऽभ्यः॥ निऽउप्ताः। च। बभ्रवः। वाचम्। अक्रत। एमि। इत्। एषाम्। निःऽकृतम्। जारिणीऽइव॥५॥

अन्वयः- यत् आदीध्ये एभिः न दविषाणि परायद्भ्यः सखिभ्यः अव हीये, बभ्रवः न्युप्ताः वाचम् अक्रमत, एषां निष्कृतं जारिणी इव एमि इत्।

व्याख्या- यत् यद्वदा अहम् आदीध्ये ध्यायामि तदानीम् एभिः अक्षैः न दविषाणि न दूषये न परितपामि। यद्वा। न दविषाणि न देविष्याणीत्यर्थः। न द्वेषये परायद्भ्यः स्वयमेव परागच्छद्भ्यः सखिभ्यः सखिभूतेभ्यः कितवेभ्यः अव हीये अवहितो भवामि। नाहं प्रथममक्षान् विसृजामीति। किंच बभ्रवः बभ्रुवर्णा अक्षाः न्युप्ताः कितवैरवक्षिप्ताः सन्तः वाचमक्रत शब्दं कुर्वेति। तदा सङ्कल्पं परित्यज्य अक्षव्यसनेनाभिभूयमाना स्वैरिणी सङ्केतस्थानं याति तद्वत् एमीत् गच्छाम्येव।

सरलार्थः- यदा अहं(कितवः) चिन्तयामि यत् अक्षैः सह न क्रीडिष्यामीति तदा मित्रकितवेभ्यः स्वं गोपयामि। परन्तु यदा अक्षाः इरिणे निक्षिप्ताः भवन्ति तदा अहं(कितवः) व्यभिचारिणी स्त्री इव गच्छामि।

व्याकरणम् -

- आदीध्ये-आपूर्वकात् आत्मनेपदिनः धी-धातोः लटि उत्तमपुरुषैकवचने।
- दविषाणि- दिव्-धातोः लेटि उत्तमपुरुषैकवचने।
- हीये- हा-धातोः कर्मणि लटि उत्तमपुरुषैकवचने।
- न्युप्ताः-निपूर्वकात्वप्-धातोः क्तप्रत्यये प्रथमाबहुवचने।
- अक्रत- कृ-धातोः लुङि आत्मनेपदे प्रथमपुरुषबहुवचने(वैदिकम्)।
- एमि- इ-धातोः लटि उत्तमपुरुषैकवचने।

पाठगतप्रश्नाः

१. अक्षसूक्तस्य कः ऋषिः, किं छन्दः, का च देवता।

२. इरिणे इत्यस्य कः अर्थः।

३. प्रावेपाः इत्यस्य कः अर्थः।

४. अच्छन् इति रूपं कथं सिद्ध्येत्।

५. जिहीळे इत्यत्र कः धातुः।

६. मर्डिता इत्यस्य कः अर्थः।

७. कितवस्य भार्याम् अन्ये प्रतिकितवाः किं कुर्वन्ति।

८. न्युप्ताः इत्यस्य कः अर्थः।

९. आदीध्ये इति रूपं कथं सिद्ध्येत्।

१०. वेदने इत्यस्य कः अर्थः।

सभामेति कितवः पृच्छमानो
जेष्यामीति तन्वा३ शूशुजानः।
अक्षासो अस्य वि तिरन्ति कामं
प्रतिदीव्ने दधत आ कृतानि॥६॥

पदपाठः- सभाम्। एति। कितवः। पृच्छमानः। जेष्यामि। इति। तन्वा। शूशुजानः॥

अक्षासः। अस्य। वि। तिरन्ति। कामम्। प्रतिऽदीव्ने। दधतः। आ। कृतानि॥६॥

अन्वयः- तन्वा शूशुजानः कितवः जेष्यामि इति पृच्छमानः सभाम् एति, अक्षासः प्रतिदीव्ने कृतानि दधतः अस्य कामं वि तिरन्ति।

व्याख्या- तन्वा शरीरेण शूशुजानः शोशुचानो दीप्यमानः कितवः कोऽत्रास्ति धनिकस्तं जेष्यामीति पृच्छमानः पृच्छन् सभां कितवसम्बन्धिनीम् एति गच्छति। तत्र प्रतिदीव्ने प्रतिदेवित्रे कितवाय कृतानि देवनोपयुक्तानि कर्माणि आ दधतः जयार्थमाभिमुख्येन मर्यादया वा दधतः कितवस्य कामम् इच्छाम् अक्षासः अक्षाः वि तिरन्ति वर्धयन्ति।

सरलार्थः- दीप्तियुक्तशरीरी कितवः जेष्यमीति चिन्तयन् अक्षगृहं प्रति गच्छति। तत्र तस्य विरोधिकितवस्य कृते कृतानि प्रदाय अक्षाः इच्छां वर्धयन्ति।

व्याकरणम् -

- शूशुजानः- शुज्-धातोः कानचि प्रथमैकवचने।
- पृच्छमानः-प्रच्छ्-धातोः शानचि प्रथमैकवचने।
- अक्षासः-अक्षाः, (वैदिकम्)।
- दधतः-धाधातोः शतृप्रत्यये प्रथमाबहुवचने। अपि च षष्ठ्यैकवचने।
- तिरन्ति- तृ-धातोः लटि प्रथमपुरुषबहुवचने।

अक्षास इदङ्कुशिनो नितोदिनो
निकृत्वानस्तपनास्तापयिष्णवः।

कुमारदेष्णा जयतः पुनर्हणो
मध्वा सम्पृक्ताः कितवस्य बर्हणा॥७॥

पदपाठः- अक्षासः। इत्। अङ्कुशिनः। निऽतोदिनः। निऽकृत्वानः। तपनाः। तापयिष्णवः॥ कुमारऽदेष्णाः। जयतः। पुनःऽहनः। मध्वा। सम्ऽपृक्ताः। कितवस्य। बर्हणा॥७॥

अन्वयः- अक्षासः इत् अङ्कुशिनः नितोदिनः निकृत्वानः तपनाः तापयिष्णवः कुमारदेष्णाः पुनर्हणः कितवस्य बर्हणा मध्वा सम्पृक्ताः।

व्याख्या- अक्षास इत् अक्षा एव अङ्कुशिनः अङ्कुशवन्तः नितोदिनः नितोदितवन्तश्च निकृत्वानः पराजये निकर्तनशीलाश्छेत्तारो वा तपनाः पराजये कितवस्य सन्तापकाः तापयिष्णवः सर्वस्वहारकत्वेन कुटुम्बस्य सन्तापशीलाश्च भवन्ति। किंच जयतः कुमारदेष्णाः धनदानेन धन्यतां लम्भयन्तः कुमाराणां दातारो भवन्ति। अपि च मध्वा मधुना सम्पृक्ताः प्रतिकितवेन बर्हणा परिवृद्धेन सर्वस्वहरणेन कितवस्य पुनर्हणः पुनर्हन्तारो भवन्ति।

सरलार्थः- अस्मिन् मन्त्रे उच्यते यत् अक्षाः अवश्यमेव अङ्कुशिनः इव अर्थात् यथा अङ्कुशिनः हस्तिनः शासनं कुर्वन्ति तथा अक्षाः अपि कितवस्य शासनं कुर्वन्ति, नितोदिनः इव अर्थात् यथा नितोदिनः अश्वं परिचालयन्ति तथैव अक्षाः अपि कितवान् परिचालयन्ति, विनाशिनः, सन्तापदाः अर्थात् कितवैः स्वपरिवाराय कष्टं अक्षाय प्रदीयते, पुत्रतुल्यधनदाः, विजयिनं पुनः हननकारिणः इव सन्ति।

व्याकरणम् -

- अक्षासः-अक्षशब्दस्य प्रथमाबहुवचने वैदिकं रूपम्।
- अङ्कुशिनः-अङ्कुशशब्दात् इनि प्रत्यये प्रथमाबहुवचने।
- निकृत्वानः-निपूर्वकात् कृद्-धातोः क्वनिप्प्रत्यये प्रथमाबहुवचने।
- तपनाः-तप्-धातोः ल्युटि प्रथमाबहुवचने।
- तापयिष्णवः-तप्-धातोः णिचि इष्णुच्प्रत्यये प्रथमाबहुवचने।
- जयतः-जिधातोः शतृप्रत्यये पञ्चम्येकवचने वा षष्ठ्यैकवचने।
- सम्पृक्ताः-सम्पूर्वकात् पृच्-धातोः क्तप्रत्यये प्रथमाबहुवचने।

त्रिपञ्चाशः क्रीळति व्रात एषां
देव इव सविता सत्यधर्मा।

उग्रस्य चिन्मन्यवे ना नमन्ते
राजा चिदेभ्यो नम इत्कृणोति॥८॥

पदपाठः- त्रिऽपञ्चाशः। क्रीळति। व्रातः। एषाम्। देवःऽइव। सविता। सत्यऽधर्मा॥
उग्रस्य। चित्। मन्यवे। न। नमन्ते। राजा। चित्। एभ्यः। नमः। इत्। कृणोति॥८॥

अन्वयः- सत्यधर्मा सविता देव इव एषाम् त्रिपञ्चाशः व्रातः क्रीळति, उग्रस्य मन्यवे न नमन्ते। राजा चित् एभ्यः नमः कृणोति।

व्याख्या- एषाम् अक्षाणां त्रिपञ्चाशः त्र्यधिकपञ्चाशत्संख्याकः व्रातः संघः क्रीळति आस्फारे विहरति। आक्षिकाः प्रायेण तावद्भिरक्षैर्दीव्यन्ति हि। तत्र दृष्टान्तः। सत्यधर्मा। सविता सर्वस्य जगतः प्रेरकः सूर्यो देव इव। यथा सविता देवो जगति विहरति तद्वदक्षाणां संघ आस्फारे विहरतीत्यर्थः। किञ्च, उग्रस्य चित् क्रूरस्यापि मन्यवे क्रोधाय एते अक्षाः न नमन्ते न प्रह्वीभवन्ति। न वशे वर्तन्ते। तं नमयन्तीत्यर्थः। राजा चित् जगतः ईश्वरोऽपि एभ्यः नम इत् नमस्कारमेव देवनवेलायां कृणोति। नावज्ञां करोतीत्यर्थः।

सरलार्थः- सूर्यदेवतुल्याः एते त्रिपञ्चाशत् अक्षाः क्रीडन्ति। एते अक्षाः कदापि क्रोधिनः सम्मुखे न नमन्ति। राजा अपि एतान् नमस्कुर्वन्ति। अवज्ञां न कुर्वन्ति इत्यर्थः।

व्याकरणम् -

- क्राळति-क्रीड्-धातोः लटि प्रथमपुरुषैकवचने। (स्वरद्वयस्य मध्यस्थत्वात् डकारस्य ळकारः)
- नमन्ते-नम्-धातोः लटि प्रथमपुरुबहुवचने वैदिकं रूपम्।
- कृणोति-कृ-धातोः लटि प्रथमपुरुषैकवचने वैदिकं रूपम्।

नीचा वर्तन्त उपरि स्फुर-
न्त्यहस्तासो हस्तवन्तं सहन्ते।
दिव्या अङ्गारा इरिणे न्युप्ताः
शीताः सन्तो हृदयं निर्दहन्ति॥९॥

पदपाठः- नीचा। वर्तन्ते। उपरि। स्फुरन्ति। अहस्तासः। हस्तऽवन्तम्। सहन्ते॥
दिव्याः। अङ्गाराः। इरिणे। निऽउप्ताः। शीताः। सन्तः। हृदयम्। निः। दहन्ति॥९॥

अन्वयः- नीचाः वर्तन्ते उपरि स्फुरन्ति। अहस्तासः हस्तवन्तं सहन्ते। इरिणे न्युप्ताः दिव्याः अङ्गाराः शीताः सन्तः हृदयं निर्दहन्ति।

व्याख्या- अपि चैतेऽक्षाः नीचा नीचीनस्थले वर्तन्ते। तथापि उपरि पराजयात् भीतानां द्यूतकराणां कितवानां हृदयस्योपरि स्फुरन्ति। अहस्तासः हस्तरहिताः अप्यक्षाः हस्तवन्तं द्युतकरं कितवं सहन्ते पराजयकरणेनाभिभवन्ति। दिव्याः दिवि भवा अपकृताः अङ्गाराः अङ्गारसदृशाः अक्षाः इरिणे इन्धनरहिते आस्फारे न्युप्ताः शीताः शीतस्पर्शाः सन्तः हृदयं कितवानामन्तः करणं निर्दहन्ति पराजयजनितसन्तापेन भस्मीकुर्वन्ति।

सरलार्थः- एते अक्षाः अधः पतन्ति। पराजयात् भीतानां कितवानां हृदयस्य उपरि च स्फुरन्ति। एते हस्तरहिताः सन्तः अपि कितवान् अभिभवन्ति। एते शीतस्पर्शाः अङ्गारसदृशाः सन्तः अपि कितवान् हृदयं दहन्ति।

व्याकरणम् -

- अहस्तासः-प्रथमाबहुवचने, (वैदिकः)लोके तु अहस्ताः, न विद्येते हस्तौ येषां ते अहस्तासः नञ्तत्पुरुषः।
- सहन्ते-आत्मनेपदिनः सह्-धातोः लटि प्रथमपुरुषबहुवचने।
- दिव्याः-दिवि भवाः दिव्याः, दिव्-धातोः यत्प्रत्यये, प्रथमाबहुवचने।
- न्युप्ताः- निपूर्वकवप्-धातोः क्तप्रत्यये प्रथमाबहुवचने।
- निर्दहन्ति-निर्पूर्वकात् दह्-धातोः लटि प्रथमपुरुषबहुवचने।

जाया तप्यते कितवस्य हीना
माता पुत्रस्य चरतः क्व स्वित्।
ऋणावा बिभ्यद्धनमिच्छमानो-
ऽन्येषामस्तमुप नक्तमेति॥१०॥

पदपाठः- जाया। तप्यते। कितवस्य। हीना। माता। पुत्रस्य। चरतः। क्व। स्वित्॥

ऋणऽवा। बिभ्यत्। धनम्। इच्छमानः। अन्येषाम्। अस्तम्। उप। नक्तम्। एति॥१०॥

अन्वयः- कितवस्य हीना जाया तप्यते, क्व स्वित् चरतः पुत्रस्य माता , ऋणावा बिभ्यत् धनम् इच्छमानः नक्तम् अन्येषाम् अस्तम् उप एति।

व्याख्या- क्व चित् क्वापि चरतः निर्वेदाद्गच्छतः कितवस्य जाया भार्या हीना परित्यक्ता सती तप्यते वियोगजसन्तापेन सन्तप्ता भवति। माता जनन्यपि पुत्रस्य क्वापि चरतः कितवस्य सम्बन्धाद्धीना तप्यते। पुत्रशोकेन सन्तप्ता भवति। ऋणावा अक्षपराजयादृणवान् कितवः सर्वतो बिभ्यद्धनं स्तेयजनितम् इच्छमानः कामयमानः अन्येषां ब्राह्मणादीनाम् अस्तं गृहम्। 'अस्तं पस्त्यम्' इति गृहनामसु पाठात्। नक्तं रात्रौ उप एति चौर्यार्थमुपगच्छति।

सरलार्थः-कितवस्य आश्रयहीना पत्नी सन्तप्ता भवति। क्वचिदपि विचरतः कितवपुत्रस्य माता दुःखिता भवति। ऋणी कितवः ऋणदातुः बिभेति। कितवश्च धनाय रात्रौ अन्यस्य गृहं प्रविशति।

व्याकरणम् -

- हीना-हाधातोः क्तप्रत्यये टापि प्रथमैकवचने।
- तप्यते-आत्मनेपदिनः तप्-धातोः लटि प्रथमपुरुषैकवचने।
- चरतः-चर्-धातोः शतृप्रत्यये षष्ठ्यैकवचने।
- बिभ्यत्-भीधातोः शतृप्रत्यये प्रथमैकवचने वैदिकं रूपम्।
- इच्छमानः-इष्-धातोः शनचि प्रथमैकवचने।

पाठगतप्रश्नाः

११. कितवः किं पृच्छन् सभाम् एति।

१२. अक्षासः इत्यस्य लौकिकं रूपं किम्।

१३. शूशुजानः इति रूपं कथं सिद्ध्येत्।

१४. मध्वा इत्यस्य लौकिकं रूपं किम्।

१५. तापयिष्णवः इति रूपं कथं सिद्ध्येत्।

१६. निकृत्वानः इति रूपं कथं सिद्ध्येत्।

१७. किमिव अक्षाणां संघः आस्फारे विहरति।

१८. कति अक्षाः आस्फारे विहरन्ति।

१९. कथं कितवस्य जाया सन्तप्ता भवति।

२०. कीदृशः कितवः ब्राह्मणादीनां गृहं प्रवशति।

स्त्रियं दृष्ट्वाय कितवं ततापा-
न्येषां जायां सुकृतं च योनिम्।
पूर्वाह्णे अश्वान्युयुजे हि बभ्रू-
न्त्सो अग्नेरन्ते वृषलः पपाद॥११॥

पदपाठः- **स्त्रियम्। दृष्ट्वाय। कितवम्। ततापा। अन्येषाम्। जायाम्। सुऽकृतम्। च। योनिम्॥ पूर्वाह्णे। अश्वान्। युयुजे। हि। बभ्रून्। सः। अग्नेः। अन्ते। वृषलः। पपाद॥ ११॥**

अन्वयः- कितवं स्त्रियम् अन्येषां जायां सुकृतं योनिं दृष्ट्वाय ततापं पूर्वाह्ण बभ्रून् युयुजे, वृषलः अग्नेः अन्ते पपाद।

व्याख्या- कितवं कितवः। विभक्तिव्यत्ययः। अन्येषां स्वव्यतिरिक्तानां पुरुषाणां जायां जायाभूतां स्त्रियं नारीं सुखेन वर्तमानां सुकृतं सुष्ठुकृतं योनिं गृहं दृष्ट्वा मज्जाया दुःखिता गृहं चासंस्कृतमिति ज्ञात्वा तताप तप्यते। पुनः पूर्वाह्णे प्रातःकाले बभ्रून् बभ्रूवर्णान् अश्वान् व्यापकानक्षान् युयुजे युनक्ति। पुनश्च वृषलः वृषलकर्मा सः कितवो रात्रौ अग्नेरन्ते समीपे पपाद शीतार्तः सन् शेते।

सरलार्थः- कितवः दुःखितां स्वपत्नीं स्वगृहं च दृष्ट्वा अन्यस्य पत्नीं सुसज्जितगृहं च पश्यन् दुःखी भवति। प्रातः अक्षान् युयुजे। सायं च अग्नेः समीपे शयानः रात्रिं यापयति।

व्याकरणम् -

- दृष्ट्वाय-दृश्-धातोः क्त्वाय(वैदिकः) लोके तु दृष्ट्वा।
- तताप-तप्-धातोः लिटि प्रथमपुरुषैकवचने।
- युयुजे-युज्-धातोः लिटि प्रथमपुरुषैकवचने।
- पपाद-पद्-धातोः लिटि प्रथमपुरुषैकवचने(लडर्थे लिट्)।

यो व॑: सोना॒नीर्म॑ह॒तो ग॒णस्य॒
राजा॒ व्राता॑स्य प्र॒थमो ब॒भूव॑।
तस्मै॑ कृणोमि॒ न धाना॑ रुणध्मि॒
दशा॒हं प्राची॒स्तदृ॒तं व॑दामि॥१२॥

पदपाठः- यः। व॒ः। से॒ना॒ऽनीः। म॒ह॒तः। ग॒णस्य॑। राजा॑। व्राता॑स्य। प्र॒थ॒मः। ब॒भूव॑॥
तस्मै॑। कृ॒णो॒मि॒। न। धना॑। रु॒ण॒ध्मि॒। दश॑। अ॒हम्। प्राची॑ः। तत्। ऋ॒तम्। व॒दा॒मि॒॥१२॥

अन्वयः- वः महतः गणस्य यः सेनानीः बभूव, व्रातस्य प्रथमः राजा, तस्मै अहम् दश प्राचीः कृणोमि, धना न रुणध्मि, तत् ऋतं वदामि।

व्याख्या- हे अक्षाः वः युष्माकं महतो गणस्य संघस्य यः अक्षः सेनानीः नेता बभूव भवति व्रातस्य च। गणव्रातयोरल्पो भेदः। राजा ईश्वरः प्रथमः मुख्यो बभूव तस्मै अक्षाय कृणोमि अहमञ्जलिं करोमि। अतः परं धना धनानि अक्षार्थमहं न रुणध्मि न सम्पादयामीत्यर्थः। एतदेव दर्शयति। अहं दशसंख्याका अङ्गुलीः प्राचीः प्राङ्मुखीः करोमि। तत् एतत् अहम् ऋतं सत्यमेव वदामि। नानृतं ब्रवीमीत्यर्थः।

सरलार्थः- अस्मिन् मन्त्रे अक्षान् प्रति उच्यते यत् हे अक्षाः युष्माकम् एकः महान् गणः अस्ति। तत्र यः प्रधानः तम् अहं नमस्करोमि। अहम् अञ्जलिं कृत्वा सत्यं वदामि यत् अहं(कितवः) धनानि न ग्रहिष्यामीति।

व्याकरणम् -

- बभूव-भूधातोः लिटि प्रथमपुरुषैकवचने।
- कृणोमि- कृधातोः लटि उत्तमपुरुषैकवचने वैदिकं रूपम्।
- रुणध्मि-रुध्-धातोः लटि उत्तमपुरुषैकवचने।
- धना- द्वितीयाबहुवचने वैदिकं रूपम्।

अक्षैर्मा दीव्यः कृषिमित्कृषस्व
वित्ते रमस्व बहु मन्यमानः।
तत्र गावः कितव तत्र जाया
तन्मे वि चष्टे सवितायमर्यः॥१३॥

पदपाठः- अक्षैः। मा। दीव्यः। कृषिम्। इत्। कृषस्व। वित्ते। रमस्व। बहु। मन्यमानः॥

तत्र। गावः। कितव। तत्र। जाया। तत्। मे। वि। चष्टे। सविता। अयम्। अर्यः॥१३॥

अन्वयः- कितव ! अक्षैः मा दीव्यः कृषिम् इत् कृषस्व। बहु मन्यमानः वित्ते समस्व, तत्र गावः, तत्र जाया तत् मे अयम् अर्यः सविता विचष्टे।

व्याख्या- हे कितव बहु मन्यमानः मद्वचने विश्वासं कुर्वंस्त्वम् अक्षैर्मा दीव्यः द्यूतं मा कुरु। कृषिमित् कृषिमेव कृषस्व कुरु। वित्ते कृष्या सम्पादिते धने रमस्व रतिं कुरु। तत्र कृषौ गावः भवन्ति। तत्र जायाः भवन्ति। तत् एव धर्मरहस्यं श्रुतिस्मृतिकर्त्ता सविता सर्वस्य प्रेरकः अयं दृष्टिगोचरः अर्यः ईश्वरः मे मह्यं वि चष्टे विविधमाख्यातवान्।

सरलार्थः- सविता कितवं प्रति कथयति यत् हे कितव अक्षैः मा क्रीड। कृषिकार्यं कुरु। तेन यत् धनं त्वं प्राप्स्यसि तत्रैव आनन्दम् अनुभव। तेनैव धनेन त्वं गाः स्वस्त्रीः च प्राप्स्यसि।

व्याकरणम् -

- दीव्यः-दीव्-धातोः लङि मध्यमपुरुषैकवचने।
- कृषस्व-कृष्-धातोः लोटि मध्यमपुरुषैकवचने(वैदिकः)।
- रमस्व-रम्-धातोः लोटि मध्यमपुरुषैकवचने।
- चष्टे-चक्ष्-धातोः लटि प्रथमपुरुषैकवचने।

मित्रं कृणुध्वं खलु मृळता नो
मा नो घोरेण चरताभि धृष्णु।
नि वो नु मन्युर्विशतामराति-
रन्यो बभ्रूणां प्रसितौ न्वस्तु॥१४॥

पदपाठः- मित्रम्। कृणुध्वम्। खलु। मृळत। नः। मा। नः। घोरेण। चरत। अभि। धृष्णु॥ नि। वः। नु। मन्युः। विशताम्। अरातिः। अन्यः। बभ्रूणाम्। प्रऽसितौ। नु। अस्तु॥१४॥

अन्वयः- मित्रं कृणुध्वम्, खलु नः मृळत, धृष्णु, घोरेण मा अभिचरत। नु वः मन्युः अरातिः नि विशतां, नु अन्यः बभ्रूणां प्रबन्धने प्रसितौ अस्तु।

व्याख्या- हे अक्षाः यूयं मित्रं कृणुध्वम्। अस्मासु मैत्रीं कुरुत। खलु इति पादपूरणः। न अस्मान् मृळत सुखयत च। नः अस्मान् धृष्णु धृष्णुना तृतीयार्थे प्रथमा। घोरेण असह्येन मा अभिचरत मा गच्छत। किञ्च वः युष्माकं मन्युः क्रोधः अरातिः अस्माकं शत्रुः नि विशताम् अस्मच्छत्रुषु तिष्ठतु। अन्यः न अस्माकं शत्रुः कश्चित् बभ्रूणां बभ्रूवर्णानां युष्माकं प्रसितौ प्रबन्धने नु क्षिप्रं अस्तु भवतु।

सरलार्थः-अस्मिन् मन्त्रे कितवाः अक्षान् प्रति वदति यत् हे अक्षाः यूयम् अस्माभिः सह मित्रं कुरुत। अस्मासु दयां कुरुत। तव भयङ्करप्रभावात् अस्मान् रक्षत। युष्माकं क्रोधं शत्रुतां च अधुना स्थिरीकुरुत। अधुना कश्चदपि अन्यः जनः अक्षमोहे मा पतेत्।

व्याकरणम् -

- कृणुध्वम्- आत्मनेपदिनः कृधातोः लोटि मध्यमपुरुषबहुवचने।
- मृळत-मृड्-धातोः लोटि मध्यमपुरुषबहुवचने।
- विशताम्-विश्-धातोः लोटि प्रथमपुरुषैकवचने।
- प्रसितौ- प्रपूर्वकात् सिधातोः क्तिन्प्रत्यये सप्तम्येकवचने।
- अरातिः-न रातिः अरातिः नञ्तत्पुरुषः, नपूर्वकात् राधातोः क्तिन्प्रत्यये प्रथमैकवचने।

पाठगतप्रश्नाः

२१. कितवः किं दृष्ट्वा तप्यते।
२२. कृणोमि इत्यस्य लौकिकं रूपं किम्।
२३. धना इत्यस्य लौकिकं रूपं किम्।

२४. दृष्ट्वाय इति रूपं क्व साधु।

२५. कथं कृषिमित्कृषष्व इति कितवं प्रति उच्यते।

२६. दीव्यः इति रूपं कथं सिद्ध्येत्।

२७. मि॒त्रं कृ॑णुध्वं॒ खलु॑...इत्यादिमन्त्रे खलु इति किमर्थम्।

२८. मृळत इत्यस्य कः अर्थः।

२९. धृष्णु इत्यत्र कस्मिन् अर्थे प्रथमा।

३०. पपाद इत्यत्र कस्मिन्नर्थे लिट्।

२१.२) अक्षसूक्तस्य सारः

ऋग्वेदे अक्षसूक्तेन अक्षनामकः देवः अभीष्टसिद्ध्यर्थं प्रार्थ्यते। सामाजिकानां कुरीतीनां, मानवेषु वर्तमानानां दुर्वासनानां च सम्पूर्णतः नाशाय अस्य सूक्तस्य आरम्भः। समाजेषु यदा भोगविलासानां तथा शक्तेः उदयः जायते तत्समकालम् एव द्यूतक्रीडायाः अपि महान् प्रचारः प्रसारश्च परिलक्ष्यते। ऋग्वेदीययुगे द्यूतक्रीडा आसीत् समाजस्थो महान् व्याधिः। इदम् अक्षसूक्तं तद्विषयम् एव आलोचयति। इदम् एव सूक्तम् अन्ते कृषिः एव करणीया इति जनान् उद्दिश्य उपदिशति।

ऋग्वेदस्य दशममण्डलस्य चतुस्त्रिंशं सूक्तं हि अक्षसूक्तम्। अस्य सूक्तस्य ऋषिः ऐलूषः कवषः मूजवत्पुत्रः अक्षो वा। अत्र सूक्ते प्रथम-सप्तम-नवम-द्वादशमन्त्रस्य च अक्षा देवताः। द्वितीय-तृतीय-चतुर्थ-पञ्चम-षष्ठ-अष्टम-दशम-एकादश-चतुर्दशमन्त्रस्य च कितवः अक्षाश्च देवताः। त्रयोदशमन्त्रस्य च कृषिर्देवता। केवलं सप्तममन्त्रं विहाय सर्वत्र त्रिष्टुप्छन्दः। सप्तममन्त्रे तु जगतीच्छन्दः अस्ति। अस्मिन् अक्षसूक्ते मूलतः अक्षक्रीडनस्य कुफलम् एव उक्तम्। अस्मिन् सूक्ते एकस्य कितवस्य जीवनं कथं भवति इति विषये उक्तम्। कथं कितवाः जीवनं यापयन्ति। तेषां पत्नीनां कीदृशी अवस्था भवति। कीदृशं तेषां गृहवैभवं भवति इत्येते मन्त्राः चतुर्दश। मन्त्रेषु यदुक्तं तदेव साररूपेण उच्यते।

द्यूतक्रीडायाः दुष्परिणामो हि लोके द्यूतासक्तः जनः निन्द्यः। तस्य पत्नी, श्वश्रूः, अन्ये शुभाकाङ्क्षिणः च तस्मै द्विषन्ति। तं प्रति कः अपि दयाभावं न प्रदर्शयति। बहुमूल्योपेतः स्थविरः अश्वः इव प्रियपात्रं न भवति द्यूतकारः। द्यूतकारः पतिव्रतां स्वपत्नीम् अपि द्यूतक्रीडायां पणरूपेण स्थापयति। अपरस्य गृहं पत्नीं च दृष्ट्वा द्यूतोन्मत्तः जनः खेदं करोति। द्यूतक्रीडायाः कठिनः दुष्परिणामः तदैव दृश्यते यदा पराजितस्य पत्नीं कश्चिद् अपरः आलिङ्गति। यदा द्यूतकारः तस्य धनराशिं पणरूपेण प्रतिज्ञाय अपि तान् प्रदातुं नेच्छति तदा राजजनैः रज्जुभिः बद्धः सः राजसमीपं नीयते। तदा तदीयां दुर्दशां परिपश्यन् स्वजनः अपि करुणां न करोति तं च परिचाययितुं न इच्छति।

अस्मिन् सूक्ते अक्षक्रीडायाः प्रभावः प्रदर्शितोस्ति। अक्षसूक्ते कितवनामकः कश्चित् अक्षक्रीडायां मत्तः आसीत्। सः बहुवारं पराजितः भूत्वा अपि न तस्याः आसक्तेः मुक्तः। अद्य जेष्यामि इति चिन्तयन् द्यूतं क्रीडित्वा यद्यपि जयति परन्तु, दिनान्ते सः सर्वशून्यः दरिद्रः भिक्षुकः इव गृहं प्राप्य अग्निसमीपवर्ति

स्थानम् आश्रयति। 'सः अग्नेरन्ते वृषलः पपाद' (१०-३४-११)। कितवस्य स्त्री यद्यपि अक्षक्रीडनात् पूर्वं कलहं न कृतवती, कितवमित्राणां कृते अनुकूला एव आसीत्। परन्तु, अक्षक्रीडनात् परं सा परित्यक्ता भवति। यः अत्र कितवः भवति तस्य भार्याम् अन्ये कितवाः केशाद्याकर्षणेन स्पृशन्ति। एवं यथा कितवस्य प्रतिकूला अवस्था जायते तथैव तस्य भार्यायाः अपि। यत्र अपरजनानां पत्न्यः सौभाग्यसुखेन जीवन्ति तत्र तत्पत्नी हीना दीना च भूत्वा अन्तर्दुःखेन दग्धा भवति। माता च मार्गेषु अटति। सः पाशक्रीडायां पराजितः सन् ऋणं करोति, परस्य गृहे आत्मानं गोपायति। इत्थं हृदयविदारकं चित्रम् अस्मिन् मन्त्रे चित्रितम्।

'जाया तप्यते कितवस्य हीना माता पुत्रस्य चरतः क्व स्वित।।

ऋणावा विभ्यद् धनमिच्छमानः अन्येषामस्तमुप नक्तमेति'।। इति।(१०-३४-१०)

अन्ते च द्यूतकारस्य बोधोदयः जातः। सः सर्वत्र पराजयम् अनुभवन् अन्ते एतां शिक्षां लब्धवान् यत् द्यूतम् अकल्याणकरं वित्तच्छेदि व्यसनं च। सः ज्ञातवान् कृषिकर्म एव प्रकृतं सुखकरं कर्म। द्यूतप्रभृतयः क्रीडाः मनुष्यान् जीवनस्रोतसः विच्छेदयन्ति। तेषु द्यूतादिषु अर्जितं धनं बहूनां परिश्रमेण उपार्जितम्। कितवः एनां शिक्षां जनेषु प्रचारयति यत्- 'अक्षैर्मा दीव्य कृषिमित् कृषस्व वित्ते रमस्व बहु मन्यमानः" इति। स्वयं सवितृदेवः अस्य सत्यस्य साक्षिरूपेण अस्ति। 'तन्मे वि चष्टे सवितायमर्यः'(१०-३४-१३)। अन्ते च कितवः अक्षाभिमानिनीं देवतां प्रणमति।

अमरसन्देशः

अक्षसूक्तस्य अधिकाधिके स्थले द्यूतक्रीडायाः दुष्परिणामं कथयन् वैदिकः ऋषिः अमरसन्देशं जनेषु प्रचारयति यत् अक्षेषु कदापि आसक्तः मा भवतु, स्वक्षतिं च मा करोतु। तथा च आम्नातम् ऋग्वेदीये अक्षसूक्ते 'अक्षैः मा दिव्यः कृषिमित् कृषस्व' इति। (१०-३४-१३) कृषिद्वारा लब्धेषु धनेषु आदरभावं प्रदर्शयन्तः तस्मादेव सुखं लभन्ताम्। कृषिकार्ये गौः तथा पालितपशुः तिष्ठति। तेन च अस्माकं समृद्धिः भवति। अतः हे अक्षभगवन् मया सह सख्यतां विधेहि। तव मोहिनीशक्तिं मयि मा विस्तारय। सदैव मम सहायको भव। एतदर्थमेव अस्मिन् सूक्ते अक्षदेवः प्रार्थ्यते 'प्रावेपा मा बृहतो मादयन्ति' इत्यादिमन्त्रैः इति शम्।

२१.३) अक्षस्वरूपम्

मानवेषु सामाजिकदुर्व्यवहाराणां निराकरणाय सूक्तानि सङ्कलितानि। अक्षसूक्तमपि एतादृशमेकं सूक्तं यत्र अक्षक्रीडायाः दुष्परिणामो वर्णितो वर्तते। अक्षसूक्ते अक्षस्वरूपं वर्णितं वर्तते। अक्षः द्यूतक्रीडायाः देवतारूपेण परिचीयते। सः देवः अक्षं तथा श्रद्दधति यथा शिल्पकारः स्वोपकरणानि श्रद्दधाति। यथा वा लेखकः स्वलेखनीं श्रद्दधाति, वणिक् च स्वतुलादण्डं श्रद्धधति। अक्षः कस्यापि फलस्य बीजात् निर्मीयते। अयं धूसरवर्णीयः भवति। एनम् कस्मिंश्चित् पात्रे संस्थाप्य हस्तैः तस्य चालनं कृत्वा क्रीडा चाल्यते। अक्षक्रीडा हि गर्हितं कर्म। मनुसंहितायाः राजधर्मप्रसङ्गे (७.४७) येषां दशानां कामजव्यसनानाम् उल्लेखः प्राप्यते तत्र अक्षक्रीडा उल्लिखिता अस्ति। तथा च श्लोकः-

'मृगयाक्षः सुरापानं दिवास्वप्नः स्त्रियो मदः।

तौर्य्यत्रिकं वृथाट्या च कामजो दशको गणः'।। इति।

महाभारतस्य सभापर्वणि अपि एतत् कर्म समं निन्दितम्। 'द्यूते क्षतः कलहो विद्यते, न को वै द्यूतं रोचते बुध्यमानः' इत्येषा पङ्क्तिः महाभारतस्य सभापर्वणि समायाति। परन्तु काचित् अज्ञाता आसक्तिः वैदिककालादेव जनान् अस्मिन् द्यूते कर्मणि आसज्जयति। अस्मिन् अक्षसूक्ते तस्य द्यूतस्य विषये तथा तस्मात् जनानां विमुक्तिविषये उच्यते।

अक्षः दिव्याङ्गारस्वरूपः महाशक्तिशाली च। अयम् अक्षः द्यूतक्रीडकं तथा आनन्दयति यथा सोमरसः देवान् आनन्दयति। अयम् अक्षः द्यूतासक्तं जनं समग्रां रात्रिं व्याप्य जागरयति। द्यूतमत्तः जनः चिन्तासक्तो भूत्वा आरात्रिं जागर्ति। अक्षस्य अन्तः विराजते काचित् मोहिनी शक्तिः। द्यूतक्रीडकः अस्याः शक्तेः वशीभवति। द्यूतासक्तः जनः द्यूतकार्यविमुखः भविष्यति इति चिन्तयन् अपि द्यूतस्थले स्वसंकल्पं विस्मरति। द्यूतासक्तः जनः तस्यां क्रीडायां कुशलं जनं दृष्ट्वा स्वपराजयं विजानन्नपि न बिभेति कदाचन। अक्षक्रीडायाः शब्देन आसक्तः जनः द्यूतस्थलं प्रति धावति यथा पुंश्चली कुलटा स्त्री वा स्वसंकेतस्थलं प्रति धावति।

द्यूतस्थले निक्षिप्तः अपि अक्षः क्रीडकस्य मर्मस्थलं तुदति भिनत्ति च। स्वयं दन्तरहितः सन् अपि सहस्रजनान् पराजेतुम् इच्छति। अक्षः शीतलस्पर्शविशिष्टः अपि द्यूतकारहृदयं दहति। प्रकृत्या काष्ठं भूत्वापि द्यूतसमये सः कञ्चिद् द्यूतकारं स्थगयति कञ्चिच्च प्रतिष्ठापयति। विजेतुः कृते सः आनन्दप्रदः पराजेतुः कृते च दुःखप्रदः।

ऋग्वेदे अक्षाणां संख्याविषये सूचनां प्रदातुं त्रिपञ्चाशः इति शब्दः प्रयुक्तः। विद्वांसः अस्य शब्दस्य अनेकान् अर्थान् कृतवन्तः। यथा- पञ्चदश, त्रिपञ्चाशत्, पञ्चविंशत्युत्तरम् एकशतम् इति। परस्मिन् समये संहिताग्रन्थेषु ब्राह्मणग्रन्थेषु च द्यूतचालनासम्बन्धिनाम् उक्तीनां तालिका समुपलभ्यते। द्यूतक्रीडार्थं भूम्याम् एकं निम्नं स्थानं निर्मीयते।

पाठसारः

अस्मिन् अक्षसूक्ते मूलतः अक्षक्रीडनस्य कुफलमेव उक्तम्। अस्मिन् सूक्ते एकस्य कितवस्य जीवनं कथं भवति इति विषये उक्तम्। कथं कितवाः जीवनं यापयन्ति। तेषां पत्नीनां कीदृशी अवस्था भवति। कीदृशं तेषां गृहवैभवं भवति। इत्येते विषयाः चतुर्दशमन्त्रैः आबद्धाः। मन्त्रेषु यदुक्तं तदेव अत्र साररूपेण कथ्यते। या कितवस्य स्त्रीः भवति सा यद्यपि अक्षक्रीडनात् पूर्वं कलहं न कृतवती, कितवमित्राणां कृते अनुकूला एव आसीत्। परन्तु, अक्षक्रीडनात् परं सैव अनुकूला स्त्री परित्यक्ता भवति। यः कितवः भवति तस्य श्वश्रूः अपि तं निवारयति। जायापि सदैव दुःखिता भवति। किञ्च यः कितवः भवति तस्य भार्याम् अन्ये कितवाः केशाद्याकर्षणेन स्पृशन्ति। एवं यथा कितवस्य प्रतिकूला अवस्था जायते तथैव तस्य भार्यायाः अपि। यद्यपि कितवः चिन्तयति यत् न क्रीडिष्यामीति तथापि इरिणे अक्षेषु

पतितेषु व्यभिचारिणीः स्त्रीः एव गच्छति। एवं तस्य दुरवस्था भवति। अक्षस्य कानिचन विशेषणानि अपि सन्ति। तानि च- अङ्कुशिनः, नितोदिनः, विनाशिनः, सन्तापदाः, पुत्रतुल्यधनदाः। एवंभूताः अक्षाः भवन्ति। न केवलम् एवंभूताः अपि तु ते क्रोधिनः सम्मुखे न नमन्ति। ते अङ्गारसदृशाः भवन्तः अपि कितवानां हृदयं दहन्ति। राजा अपि तान् अवज्ञां न करोति। ततः कितवानां का स्थितिः भवतीति उच्यते। ये कितवाः भवन्ति तेषां स्त्रियः दुःखिताः भवन्ति। कितवश्च ऋणदातुः बिभेति। कितवः रात्रौ अन्यस्य गृहं प्रविशति चौरार्थम्। कितवः स्वस्य स्त्रियं गृहवैभवम् अन्यस्य भार्यां गृहवैभवं च दृष्ट्वा दुःखितः भवति। एवं कितवस्य जीवनं चलति। ततः अक्षसूक्तस्य द्वादशचतुर्दशयोः मन्त्रयोः अक्षान् प्रति कितवानां प्रार्थनाज्ञापनम् अस्ति। किञ्च त्रयोदशमन्त्रे अक्षक्रीडां परित्यज्य कृषिकरणाय उक्तम्। एवमेव सम्पूर्णाक्षसूक्ते अक्षाणां विवरणं, तेषां कुफलं, कितवानां परिणामं च सन्ति।

पाठान्तप्रश्नाः

१. अक्षसूक्तस्य सारं लिखत।

२. अक्षक्रीडनात् कितवस्य किं भवति इति समन्त्रं व्याख्यात।

३. अक्षकीडां परित्यज्य किं करणीयम् इति विषयकं मन्त्रं लिखित्वा व्याख्यात।

४. मित्रं कृणुध्वं खलु... इत्यादिमन्त्रं पूरयित्वा व्याख्यात।

५. नीचा वर्तन्त उपरि... इत्यादिमन्त्रं पूरयित्वा व्याख्यात।

पाठगतप्रश्नानाम् उत्तराणि

उत्तराणि-१

१. ऐलूषकवषः ऋषिः, त्रिष्टुप् ७जगती च छन्दसी, अक्षः ऋषिः देवता।

२. आस्फारे।

३. कम्पनशीलाः।

४. छन्द्-धातोः लुङि प्रथमपुरुषैकवचने।

५. हीड्धातुः।

६. सुखयिता।

७. वस्त्रकेशाद्याकर्षणेन संस्पृशन्ति।

८. अवक्षिप्ताः।

९. आपूर्वकात् आत्मनेपदिनः धीधातोः लटि उत्तमपुरुषैकवचने।

१०. धने।

उत्तराणि-२

११. कोऽत्रास्ति धनिकस्तं जेष्यामीति।

१२. अक्षाः।

१३. शुज्-धातोः कानचि प्रथमैकवचने।

१४. मधुना।

१५. तप्-धातोः णिचि इष्णुच्प्रत्यये प्रथमाबहुवचने।

१६. निपूर्वकात् कृद्-धातोः क्वनिप्प्रत्यये प्रथमाबहुवचने।

१७. यथा सविता देवो जगति विहरति।

१८. त्रिपञ्चाशत्।

१९. वियोगजसन्तापेन पुत्रशोकेन च।

२०. अक्षपराजयादृणवान्।

उत्तराणि-३

२१. स्वव्यतिरिक्तपुरुषाणां सुखेन वर्तमानां जायां सुष्ठुकृतं गृहं च दृष्ट्वा मज्जाया दुःखिता गृहं चासंस्कृतमिति ज्ञात्वा।

२२. करोमि।

२३. धनानि।

२४. वेदे।

२५. तत्र कृषौ गावः भवन्ति। तत्र जायाः भवन्ति। तत् एव धर्मरहस्यम्।

२६. दीव्-धातोः लङि मध्यमपुरुषैकवचने।

२७. पादपूरणार्थम्।

२८. सुखयत।

२९. तृतीयार्थे।

३०. लडर्थे।

॥ इति एकविंशः पाठः ॥